# DIET KANNUR
# MUKULAM SSLC MODEL EXAMINATION – 2022
## संस्कृतम्

अङ्काः - ४०  समयः- एकार्धहोरा

……………………………………………………………………………………………… ………………………………… .

**निर्देशाः -**

* 15 निमेषाः समाश्वाससमयः । प्रश्नान् पठितुम् इच्छानुसारं चयितुम् अयं समयः उपयोक्तव्यः ।
* प्रश्नस्य निर्देशान् सम्यक् पठित्वा एव उत्तराणि लेखनीयानि ।
* उत्तरलेखनाय समयः अङ्काः च परिगणनीयाः।
* 1- 40 प्रश्नेभ्यः परमतः 40 अङ्काः कल्पिताः

## Part – 1

**A- ( 1- 6) चतुर्णां प्रश्नानां समुचितमुत्तरं कोष्टकात् चित्वा लिखत -** **4 x 1 = 4**

1. सुखदुःखयोः कर्ता कः ?
   ( मनः, बुद्धिः, आत्मा )
2. तुष्ठिः केषाम् उत्तमं भवति ?
   ( लाभानाम्, सुखानाम्, धनानाम् )
3. सस्यानि प्रमुखतया कतिविधानि भवन्ति ?
   ( त्रिविधम्, चतुर्विधम्, पञ्चविधम् )
4. **धिक्** शब्दयोगे का विभक्तिः ?
   ( पञ्चमी , तृतीया , द्वितीया )
5. भारतस्य प्रथमः उपराष्ट्रपतिः कः?
   ( राजेन्द्रप्रसाद्, डा. एस् राधाकृष्णः,जेवहर्लाल् नेह्रु )
6. सङ्गीतविद्यायाः नामान्तरं किम्?
   ( धनुर्विद्या, गान्धर्वविद्या, वास्तुविद्या)

**B- ( 7- 9) - प्रश्नानां समुचितमुत्तरं कोष्टकात् चित्वा लिखत -** **3 x 1 = 3**

7. उपमा कालिदासस्य ,भारवेः ----------- ।
   ( पदलालित्यं , अर्थगौरवम् , अलङ्कारवैभवम् )
8. अभिज्ञानशाकुन्तलस्य इतिवृत्तं कस्मात् ग्रन्थात् स्वीकृतम् ?
   ( महाभारतात् , रामायणात् , भागवतात् )
9. विश्वजिन्नाम यागं कः चकार ?
   ( विश्वामित्रः , वाजस्त्रवसः, कण्वः )

## Part- II

**A- 10. मातृकानुसारं ऋते उपयुज्य वाक्यं परिवर्तयत -** 1 x 2 = 2

**उदा.** - महानसे लवणं नास्ति । अन्यत् सर्वं अस्ति ।

महानसे लवणात् ऋते अन्यत् सर्वं अस्ति ।

भोजनाय पायसं नास्ति । अन्यत् सर्वं अस्ति ।

**B. 11- 12 द्वयोः प्रश्नयोः एकस्य उत्तरं लिखत -** 1 x 2 = 2

**11. गद्यक्रमं लिखत -**

यूयं स्वधर्माचरणं परेषा-
मालोकनार्थं जनतासमक्षं ।
मा कर्ष्ट नाकस्थपितुर्न लभ्यो
यद्येवमुत्तुङ्गकृपाप्रसादः ।।

यूयं- - - - - - - परेषां आलोकनार्थं - - - - - - मा कार्ष्ट । एवं यदि- - - - - - उत्तुङ्गकृपाप्रसादः न - - - - - ।

**12. श्लोकं पठित्वा आशयं चित्वा लिखत ।**

अविद्यायामन्तरे वर्तमानाः
स्वयं धीराः पण्डितंमन्यमानाः ।
दन्द्रम्यमाणाः परियन्ति मूढा
अन्धेनैव नीयमानाः यथान्धाः ॥

(क) अज्ञानं दूरीकर्तुं श्रेष्ठान् उपगच्छन्तु ।

(ख) अज्ञानिनः निरङ्कुशाः भवन्ति ।

(ग) स्वयं पण्डितंमन्याः अज्ञाः कुपन्थानं प्राप्नुवन्ति ।

## Part - III

**A. 13- 16 प्रश्नेषु त्रयाणाम् उत्तराणि लिखत -** 3 x 3 = 9

13. **(क) . उदाहरणानुसारम् एकपदं लिखत -**

मितश्च असौ आहारः च - मिताहारः ।

हितश्च असौ आहारः च - . . . . . . . . . ...

**(ख) . उदाहरणानुसारम् पदच्छेदं लिखत -**

पुत्रोऽपि - पुत्रः + अपि ।

बालोऽपि - - - - - + - - - - - ।

**(ग) . अधोदत्तवाक्यात् सम्बोधनारूपं चित्वा लिखत -**

" पुत्र ! महात्मनां जीवनम् अनुसर " ।

**14. अधोदत्तेषु शतृ- शानजन्तरूपाणि विविच्य लिखत-**

( नुद्यमानः, गच्छन् , पठन् , गम्यमानः , जल्पमानः , प्रेरयन् )

15. **लट्- लङ्- लोट् रूपाणि पूरयत -**

| लङ् | लट् | लोट् |
|---|---|---|
| अगच्छत् | गच्छति | ... ... ... ... ... .... |
| ... ... ... ... ... .... | लिखति | लिखतु |
| अनयत् | ... ... ... ... ... ... .... . | नयतु |

16. **अधोदत्तवाक्यात् क्त्वान्त- ल्यबन्त- तुमुन्नन्तरूपाणि विविच्य लिखत -**

द्विजस्य दारिद्र्यम् दृष्ट्वा श्रीशङ्करः तस्मात् तं मोचयितुं निश्चित्य लक्ष्मीदेवीं प्रार्थयामास ।

B. 17. **अधोदत्तेभ्यः वेदाः- वेदाङ्गानि च विविच्य लिखत -** 1 x 3 = 3

( ऋक् , व्याकरणं, शिक्षा , यजुः, कल्पः , सामः

## Part IV

A. ( 18- 20) **प्रश्नेभ्यः द्वयोः उत्तरं लिखत -** 2 x 4 = 8

18 - **सूचनानुसारं सस्यानां प्रभेदमधिकृत्य लघुटिप्पणीं लिखत -**

सस्यानि प्रमुखतया. . . . . . . . . . . वृक्षः, . . . . . . . . . अव्यक्तपुष्पः. . . . . . . . . वीरुत् ... ... ....
ओषधिः ... .... . . उदाहरणानि ... ... .... ।

19. **श्लोकं पठित्वा अधोदत्तप्रश्नानां उत्तराणि लिखत ।**

विधिना खलु वञ्चिता वयं
वितरीतुं वटवे न शक्नुमः ।
अपि भैक्ष्यमकिञ्चनत्वतो
धिगिदं जन्म निरर्थकं गतम् ।।

( क) कस्मै भैक्ष्यं वितरीतुं न शक्नुमः ?

( ख) केन वञ्चिताः?

( ग) श्लोके **निष्प्रयोजनम्** इत्यर्थे प्रयुक्तं पदं किम् ?

( घ) **धिगिदं** - इत्यस्य पदच्छेदः लिखत ।

20. **सूचनानुसारं जीवनचरितं लिखत -**

| | | |
|---|---|---|
| नाम | - | डा. पि. के. नारायणपिल्ला । |
| जननम् | - | 1910 डिसंबर् 24 तिरुवल्ला । |
| मातापितरौ | - | गोदवर्मा, लक्ष्मि अम्मा च । |
| प्रशस्तिः | - | कैरलिसाहित्यकारः, संस्कृतपण्डितः च । |
| पुरस्कारः | - | केन्द्रसाहित्य अक्कादमी, केरलसाहित्य अक्कादमी च । |
| कृतयः | - | विश्वभानुः, कैरलीध्वनिः, साहित्यकेली च । |
| दिवंगतः | - | 1990 मार्च् 20 |

**B. 21 – 22 प्रश्नेभ्यः एकस्य उत्तरं लिखत -**

**21. खण्डिकां पठित्वा प्रश्नानां उत्तराणि लिखत -** **1 x 4 = 4**

महाकवि कालिदासस्य प्रशस्तं नाटकं भवति अभिज्ञानशाकुन्तलम् । तत्र नायकः दुष्यन्तः नायिका शकुन्तला च। नाटकेऽस्मिन् सप्त अङ्काः सन्ति । मुख्यरसः भवति शृङ्गारः । शकुन्तलायाः दुष्यन्तस्य च प्रणयं , गान्धर्वरीत्या तयोः विवाहं च अतिमनोहरतया वर्णितमत्र। चतुर्थोऽङ्के कण्वमहर्षिः पुत्रीं शकुन्तलां पतिगृहं प्रेषयति । तदवसरे अनेन कृतः उपदेशः मानवजीवने बहूपकारकं रमणीयं हृद्यं च भवति ।

(क) अभिज्ञानशाकुन्तलस्य कर्ता कः ?

(ख) नाटके मुख्यरसः कः ?

(ग) **नाटकेऽस्मिन्** इत्यत्र पदच्छेदः कः ?

(घ) नाटके किं वर्णितम् ?

**22. यथोचितं पट्टिकां पूरयत -**

| **महाकाव्यम्** | **नायिका** |
|---|---|
| कुमारसम्भवम् | ……………………. |
| ………………. | सीता |
| किरातार्जुनीयम् | …………. . . |
| ………………….. | दमयन्ती |

## Part V

**A. 23 – 24 प्रश्नेभ्यः एकस्य उत्तरं लिखत**

**23. प्रादेशिकभाषायां विवर्तयत -** **1 x 5 = 5**

पञ्चमहाकाव्येषु अन्यतमं भवति महाकवि माघस्य शिशुपालवधम् । माघविरचितत्वात् तस्य माघम् इति नामान्तरमपि अस्ति। अलङ्कारप्रयोगेण पदलालित्येन अर्थगौरवेण च प्रसिद्धं भवति इदं महाकाव्यम् । काव्येऽस्मिन् विंशति सर्गाः सन्ति। चेदिराजस्य शिशुपालस्य द्वारकाधिपतेः श्रीकृष्णस्य च युद्धम् , अन्ते शिशुपालस्य वधं च प्रतिपादयति।

24. भारतीयासु चतुःषष्टिकलासु अन्यतमा भवति संङ्गीतम् । सामवेदस्य उपवेदस्य अस्य गान्धर्वविद्या इति नामान्तरमपि अस्ति। त्यागराजस्वामि, मुत्तुस्वामी दीक्षितः, स्वातितिरुनाल् प्रभृतयः सङ्गीतोपासनया कीर्तिमाप्ताः। तेषु तञ्चावूर्देशीयः त्यागराजः प्रसिद्धः भवति। मानवसेवापेक्षया ईश्वरसेवा एव प्रधानमिति मत्वा ईश्वरकीर्तिपराणि बहूनि कीर्तनानि तेन अरचयत्।

************************************************